संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - ७
प्रधानसम्पादकः - वेम्पटि कुटुम्बशास्त्री

वासुदेवकविविरचितं

# युधिष्ठिरविजयम्

## शोक्कनाथविरचित-बालव्युत्पत्तिकारिणी-टीकोपेतम्

सम्पादकः
वाई० एस्० रमेशः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

Samskrita Varsha Smriti Grantha Mala
Unpublished Manuscript Publication - 7
General Editor - Vempaty Kutumba Sastry

# BĀLAVYUTPATTIKĀRIṆĪ COMMENTARY

*OF ŚOKKANĀTHA*

*ON*

# YUDHIṢṬHIRAVIJAYAM

*OF*

*VĀSUDEVA KAVI*

Editor
Y. S. Ramesh

Rashtriya Sanskrit Sansthan
New Delhi

# भूमिका

## १.० काव्यस्य उपादेयता—

विदितमेवेदं विदुषां यज्जगत्यस्मिन् सर्वोऽपि जन: सुखमेव समीहते, धर्मश्च सुख-साधनमिति यद्यपि वेदशास्त्रपुराणानि सुखसाधनं धर्ममुपदिशन्ति तथापि तत्र सुकुमारमतीनां विनेयानां प्रवृत्तिर्न संभाव्यते। अत: सुकुमारमतीनां विनयने सरस: कश्चन मार्ग: अपेक्ष्यते। रसमय एव हि कर्तव्योपदेश: सरलमतीनां राजपुत्राणां राजपुत्रप्रायाणां वावश्यं हृदयमनुप्रविशति। स च रसमय: कर्तव्योपदेश: काव्याद् भवतीति[१]काव्यमावश्यकमापतति।

[२]काव्यं ह्यभिजातानां हृदयाह्लादकारकत्वेन, धर्मादिचतुर्वर्गसाधनोपायत्वेन, चतुर्वर्गफलास्वादातिरिक्तचमत्कारजनकत्वेन च प्रसिद्धमास्ते। [३]कटुकौषधकल्पशास्त्रवैलक्षण्येन लोकोत्तरानन्दप्रदं काव्यं रसकवलोपकल्पनपुर:सरं कर्तव्यमार्गमुपदिशति, अविवेकं च निरस्यतीति काव्याध्ययनमावश्यकं भवति।

[४]काव्याध्ययनेन अल्पबुद्धिरपि मानव: सुखेन चतुर्वर्गफलं प्राप्तुं प्रभवति।

## १.१. काव्यलक्षणम्—

सरसतापादनपुर:सरं कान्तासंमिततया कर्तव्यमार्गमुपदिशत: काव्यस्य लक्षणं बहुभि: बहुधा प्रपञ्चितं वर्तते। तथा हि—केचन [५]सहितशब्दार्थयुगलं काव्यमिति; अन्ये [६]इष्टार्थ-

---

१. यद्वेदात् प्रभुसंमितादधिगतं शब्दप्रधानाच्चिरं
यच्चार्थप्रवणात् पुराणवचनादिष्टं सुहृत्संमितात्।
कान्तासंमितया यया सरसतामापाद्य काव्यश्रिया
कर्तव्ये कुतुकी बुधो विरचितस्तस्यै स्पृहां कुर्महे॥ द्र. विद्या. प्र.रु. I.8

२. धर्मादिसाधनोपाय: सुकुमारक्रमोदित:।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारक:॥
चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।
काव्यामृतरसेनान्तश्चमत्कारो विधीयते॥ द्र. कुन्त. वक्रो. I. 3 &5

३. कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम्।
आह्लाद्यमृतवत्काव्यमविवेकगदापहम्॥ id. I.5. अन्तर.श्लो.

४. चतुर्वर्गफलप्राप्ति: सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥ द्र. विश्व. सा.द. I.2

५. शब्दार्थौ सहितौ काव्यम्। भा. का. I. 16

६. तै: शरीरं च काव्यानामलंकाराश्च दर्शिता:।
शरीरं तावदिष्टार्थव्यवच्छिन्न पदावली॥ द. काव्या. I. 10

# विषयानुक्रमणिका


| विषयः | पृष्ठसंख्या |
| --- | --- |
| शुभ सन्देश | v |
| आमुखम् | vii-viii |
| भूमिका | ix-xxxviii |
| ग्रन्थेऽस्मिन् परामृष्टनाम् अन्यग्रन्थानां तत्सङ्केतानां च सूची | xil-xlii |
| प्रथमाश्वासः | १-९२ |
| मङ्गलाचरणम् | |
| कवेर्वासुदेवस्य तद्गुरोश्च परिचयः | |
| पाण्डुराजस्य मृगयावर्णनम् | |
| पाण्डोः मुनिशापः | |
| पाण्डोः तपश्चर्यावर्णनम् | |
| धर्मजादीनां जन्मवृत्तान्तः | |
| पाण्डोः मरणम् | |
| माद्र्याः पाण्डुसहगमनम् | |
| धर्मजादीनां शस्त्रशिक्षाभ्यासः | |
| दुर्योधनादीनां भीमसेनमारणोद्यमाः | |
| लाक्षागृहदाहवर्णनम् | |
| भीमहिडिम्बासुरयुद्धवर्णनम् | |
| हिडिम्बया भीमसेनस्य विवाहः घटोत्कचजननम् च | |
| एकचक्रपुरे पाण्डवानां वासः | |
| बकासुरवृत्तान्तः | |
| द्रौपदीस्वयंवरव्यवस्था | |
| पाण्डवानां चित्ररथस्य च संवादः | |
| द्रौपदीस्वयंवरार्थं ब्राह्मणवेषधारिणां पाण्डवानां पाञ्चालनगरागमनं, कुलालगृहावासश्च | |

इति । अत्र महत्या गङ्गया गिरिशजटामण्डलोपलक्षणस्य भ्रमणरूपचरितस्य कथनादुदात्तमलङ्कारः[१] ॥ तदुक्तं काव्यप्रकाशे—

**'उदात्तं वस्तुनः संपत् महतां चोपलक्षणम्'।**

इति । चन्द्रलोके तु[२]—'उदात्तमृद्धिश्चरितं श्लाध्यं वा न्योपलक्षणम् ।' इति ॥ ३ ॥

**मूलम्—**

**अस्ति च गजराजगती**
**राजवरो येन गतशुगजरा जगती ।**
**भीषणमधिकं कवयः**
**स्तुवन्ति जन्यं यदीयमधिकङ्कवयः ॥ ४ ॥**

**बा. व्यु.—**


कविः स्वकाव्यकरणसमयं[३] वक्तुं तत्कालोपलक्षकं राजानमभिस्तौति[४] **अस्तीत्यादिना**[५]—अतएव शकाब्द इति व्यवहारः येन कुलशेखराख्येन राज्ञा[६] जगती जनः । 'जगती भुवने क्ष्मायां छन्दोभेदे जनेपि च' इति विश्वः । गतशुक् विनष्टशोका । 'मन्यु[७] शोकौ तु शुक् स्त्रियाम्' इत्यमरः । अजरा च न विद्यते[८] जरा वयोहानिः अपमृत्युः यस्याः सा तादृशी । नञोस्त्यर्थानां बहुब्रीहिर्वाच्योत्तरपदलोपश्चेति समासलोपौ । येन गतशुगित्यने प्रजारंजकताख्यो नायकगुणो व्यज्यते । तदुक्तं रसार्णवे—




**तेजस्विता कलावत्त्वं प्रजारंजकतादयः ।**
**एते साधारणाः प्रोक्ताः नायकस्य गुणा बुधैः ॥**

इति । कवयः[९] काव्याकर्तारः कौति शब्दायते विमृशति रसभावानिति कविः । कु शब्द इत्यस्माद्धातोः 'अच इः' । अधिकं भीषणं भयङ्करम् । अधिकङ्कवयः अधिगतानि प्राप्तानि[१०]

---

१. A 5, M 4 & 7. दुदात्तालंकारः For दुतात्तमलङ्कारः ।
२. A 3, 4 & 7, M 4, 6 & 7 च For तु ।
३. A 3, 4 & 7, M 6 काव्यसमयं For काव्यकरणसमयं ।
४. A 5, A 4 & 7, राजानं स्तौति For राजानमभिस्तौति ।
५. A 3, 4 & 7, स 6 अस्तीति For अस्तीत्यादिना ।
६. A 5 & 7, स 4, 6 & 7 कुलशेखराख्येन जगती For कुलशेकराख्येन राज्ञा ।
७. A 3, 4 & 7, M 6 विनष्टशोका । अजरा For विवष्टशोका । मन्यु........अजरा ।
८. A 5, M 4 & 7 अजरा च जरा वयोहानिरपमृत्युर्न विद्यते For अजरा च न विद्यते जरा वयोहानिः । अपमृत्युः ।
९. A 5, M 4 & 7 कवयः कविशब्दार्थस्तूत्तरत्र वक्ष्यते For कवयः काव्यकर्तारः........अच इः ।
१०. A 4, 5 & 7, M 4, 6 & 7 अधिगतानि कंकाख्यानि For अधिगतानि प्राप्तानि कंकाख्यानि ।

**Rashtriya Sanskrit Sansthan**
56-57, Institutional Area, Janakpuri,
New Delhi 110 058